# कमल

**उत्पलानि कषायाणि रक्तपित्तहराणि च।**
**कुमुदोत्पल-नालास्तु सपुष्पाः सफलाः स्मृताः।।**
**शीताः स्वादुकषायास्तु कफमारुतकोपनाः।।**
**कषायमीषाद्विष्टम्भि रक्तपित्तहरं स्मृतम्।**
**पौष्करन्तु भवेद् बीजं मधुरं रसपाकयोः ।।** (चरक)

Utpala is Kashaya in rasa and cures raktapitta.

Kumudotpala, nala, sapuspa, saphala are svadu, kashaya in rasa, sita in veerya, increase kapha and maruta.

Bijam is kashaya, madhura in rasa, vistambhi in guna, madhura in paka, pauskara, cures raktapitta.

**सतिक्तं मधुरं शीतं पद्मं पित्तकफापहम्।**
**मधुरं पिच्छिलं स्निग्धं कुमुदं ह्लादि शीतलम्।।**
**तस्मादल्पान्तरगुणे विद्यात् कुवलयोत्पले।।** (सुश्रुत)

Padma is tikta, madhura in rasa, sita in veerya, and alleviates pitta and kapha

Kumuda is madhura in rasa, picchila, snigdha in guna, sita in veerya and hladi.

Kuvalaya utpala is of alpa guna.

**पुण्डरीकं हिमं तिक्तं मधुरं पित्तनाशनम्।**
**दाहघ्नमस्त्रशोषघ्नं पिपासाभ्रमनाशनम्।। (Rjn, Dhn)**

Pundarika is tikta, madhura in rasa, hima in veerya, destroys pitta, relieves daha, pipasa, bhrama, asra and sosa.

नीलाब्जं शीतलं स्वादु सुगन्धि पित्तनाशनम्।
रुच्यं रसायने श्रेष्ठं देहदार्ढ्यञ्च केशदम्।। (Dhn, Rjn)

Nilabja is svadu in rasa, sitala in veerya, destroys pitta, is sugandhi, rucya, rasayana srestha, deha dardhya kara and kesada.

पाके रक्तोत्पलं शीत तिक्तञ्च मधुरं रसे।
भिनत्ति पित्तसन्तापौ ध्वंसयत्यस्रजां रुजम्।। (Dhn)

Paka raktotpala is tikta, madhura in rasa, sita in veerya, cures pitta santapa and asra ruja.

कोकनदं कटु तिक्तं मधुरं शिशिरं च रक्तदोषहरम्।
पित्तकफवातशमनं सन्तर्पणकारणं वृष्यम्।।
कमलं भ्रान्ति-सन्तापशान्तिदं तर्पणं परम् ।। (Rjn)

Kokanada is katu, tikta, madhura in rasa, sisira in veerya, alleviates rakta dosha, pacifies pitta, kapha, is santarpakarana and vrshya.

Kamala pacifies bhranti, santapa and is tarpana param .

कुमुदं शीतलं-स्वादु पाके तिक्तं कफापहम्।
रक्तदोषहरं दाहश्रमपित्तप्रशान्तिकृत्।। (Dhn, Rjn)

Kumuda is tikta in rasa, sita in veerya, svadu in paka, alleviates kapha, rakta dosha, cures daha, srama and pitta.

उत्पलिनी हिमतिक्ता रक्तामयहारिणी च पित्तघ्नी।
तापकफकासतृष्णा-श्रमवमिशमनी च विज्ञेया।। (Rjn)

Utpala is tikta in rasa, hima in veerya, hara, alleviates pitta, cures tapa, kapha, kasa, trsna, raktamaya and srama.

पद्मिनी शिशिरा रूक्षा कफपित्तहरा स्मृता।

पद्मिनी मधुरा तिक्ता कषाया शिशिरा परा।
पित्तकृमिशोषवान्ति-भ्रान्ति-सन्ताप-शान्तिकृत्।। (Rjn)

Padmini is madhura, tikta, kashaya in rasa , ruksa in guna, sisira in veerya, alleviates kapha pitta, sisira para, cures pitta, krmi, sosa, bhranti and santapa.

अविदाहि बिसं प्रोक्त रक्तपित्तप्रसादनम् ।
विष्टम्भि मधुरं रूक्षं दुर्जरं वातकोपनम्।।(Dhn)

Bisa is madhura in rasa, vistambhi, ruksa in guna, increase vata, is avidahi, raktapitta prasadana and durjara.

मृणालं शिशिरं तिक्तं कषायं पित्तदाहजित्।
मूत्रकृच्छ्रविकारघ्नं  रक्तवान्तिहरं परम्।। (Rjn)

Mrnala is tikta, kashaya in rasa, sisira in veerya, alleviates pitta, cures daha, mutrakrcchra and raktavanti.

पद्मकन्दः कषायः स्यात् स्वादे तिक्तो विपाकतः।
शीतवीर्योऽस्त्रपित्तोत्थरोगभंगाय कल्पते।।(Dhn)

Padma kanda is kashaya, tikta in rasa, sita in veerya, svadu in paka and used in asra pitta vikara.

शालूकं कटु विष्टम्भि रूक्षं रुच्यं कफापहम्।
कषायं कासपित्तघ्नं तृष्णादाह-निवारणम्।।(Rjn)

Saluka is Katu, Kashaya in rasa, Vistambhi, Ruksa, rucya, Kapha hara, Kasa pittaghna, Trsna daha nivarana.

तृष्णघ्नं शीतलं रूक्षं पित्तरक्तक्षयापहम्।
पद्मकेसरमेवोक्तं पित्तघ्नं सकषायकम्।। (Dhn)

Padma kesara is Sitala in virya, Ruksa, Pitta rakta ksayapaha, Pittaghna, Kashayaka.

**किंजल्कं मधुरं रूक्षं कटु चास्त्रव्रणापहम्।**
**शिशिरं रूच्यपित्तघ्नं तृष्णादाहनिवारणम्( Rjn)**

Kinjlaka is Madhura, Katu, in rasa, Ruksa, Asra vrana hara, Sisisra, Rucya, Pittaghna, Trsna daha nivarana.

**संवर्त्तिका (नवदलं) हिमा तिक्ता कषाया दाहतृट्प्रणुत्।**
**मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशनी।।**
**पद्मस्य कर्णिका (बीजकोषः) तिक्ता कषाया मधुरा हिमा।**
**मुखवैशद्यकृल्लघ्वी तृष्णास्त्रकफपित्तनुत्।।(Bpn)**

Samvartika is Hima, Tikta, Kashaya, Daha trt pranut, Mutra krcchra Guda vyadhi Rakta pitta vinasini.

Its Karnika is Tikta, Kashaya, Madhura in rasa, Hima in virya, Mukha vaishadhya kara, Laghu, Trsna asra Kapha pitta hara.

**स्वादु तिक्तं पद्मबीजं गर्भस्थापनमुत्तमम् ।**
**रक्तपित्तप्रशमनं किञ्चिन्मारुत कृद्भवेत्।।(Dhn)**

Padma bija is Svadu, Tikta in rasa, Garbhasthapana uttama, Raktapitta prasamana, Kincit Maruta karaka.

**पद्मबीजं कटु स्वादु पित्तच्छर्दिहरं परम्।**
**दाहास्त्रदोषशमनं पाचनं रुचिकारकम्।।(Rjn)**

Padma bija is Katu, Svadu in rasa, Pitta chardi hara, Daha asra dosha samana, Pacana, Ruci karaka.